तत्खस्वस्तिकान्तरस्थिततदीयदृग्वृत्तप्रदेशांशज्या कोटिः। मध्यलग्नत्रिभोनलग्नान्तरांशज्या क्रान्तिवृत्तस्थो भुजः। अत्र भुजानयनं चोदयलग्नस्यक्रान्तिवृत्तप्रदेशः। प्राक्स्वस्तिकात् तदग्रान्तरेणोत्तरदक्षिणो भवति। एवमस्तलग्नप्रदेशः परस्वस्तिकाद्दक्षिणोत्तरः। तदनुरोधेन च त्रिभोनलग्नप्रदेशक्रान्तिवृत्तीययाम्योत्तरवृत्तरूपतद्दृग्वृत्तक्षितिजसम्पातात् तदग्रान्तरेण लग्नमवश्यं भवति। अतस्त्रिजग्रातुल्यमध्यलग्नदृग्ज्यया लग्नाग्रातुल्यो भुजस्तदाभीष्टतद्दृग्ज्यया क इत्यनुपातेन स फलःज्ञः। तद्वर्गोनान्मध्यलग्नदृग्ज्यावर्गान्मूलं त्रिभोनलग्नस्य दृग्ज्या दृक्क्षेपाख्या। एतद्वर्गोनात् त्रिज्यावर्गान्मूलं त्रिभोनलग्नशङ्कुर्दृग्गतिसञ्ज्ञः। अत्रेदमवधेयम्। त्रिप्रश्नाधिकारोक्तप्रकारेण त्रिभोनलग्नस्य शङ्कुदृग्ज्ये दृग्गति दृक्क्षेपतुल्ये न भवतः। किन्तु दृग्गतिदृक्क्षेपाभ्यां क्रमेण न्यूनाधिके भवतः सर्वदा धूलीकर्मणानुभवात्। अत आनीतोऽयं दृक्क्षेपस्त्रिभोनलग्नदृङ्मण्डलस्थितोऽपि न त्रिज्यानुरुद्धः। किन्तु फलवर्गोनत्रिज्यावर्गपदरूपवित्तवृत्तव्यासार्धप्रमाणेन सिद्ध इति गम्यते। अतो दृग्ज्यायास्त्रिज्यानुरुद्धत्वेन त्रिज्यावृत्तपरिणतो दृक्क्षेपस्त्रिभोनलग्नस्य दृग्ज्या स्फुटदृक्क्षेपरूपा। अस्यास्त्रिज्यावर्गेत्यादिना दृग्गतिः स्फुटा त्रिभोनलग्नशङ्कुरूपा। एतदनुक्तिः स्वल्पान्तरत्वाद्गणितसुखार्थं कृपालुना कृता। त्रिप्रश्नक्रियागौरवभियैतन्मार्गान्तरं लाघवादुक्तमिति दिक्। अथ लाघवाद्दृक्क्षेपदृग्गती गणितसुखार्थं श्लोकार्धेनाह” रङ्ग० “नतांशबाहुकोटिज्ये स्फुटे दृक्क्षेपदृग्गती। एकज्यावगतश्छेदो लब्धं दृग्गतिजीवया” सू०। “दशमभावनतांशानां भुजकोट्योर्नतांशतद्रूननवतिरूपयोरनयोर्ज्ये क्रमेण दृक्क्षेपदृग्गती अस्फुटे स्थूले। यत्तु स्फुटे प्रागुक्ते दृक्क्षेपदृग्गती विहाय गणितलाघवार्थं दशमभावनतांशभुजकोट्योर्ज्ये तत्स्थानापन्ने ग्राह्ये। तत्तूदयज्याभावे नतांशबाहुकोटिज्ये दृक्क्षेपदृग्गती स्फुटे इति तन्न उक्तप्रकारेणैतत्सिद्धेस्तत्कथनस्य व्यर्थत्वात्। अत्रोपपत्तिः। त्रिभोनलग्नस्य दशमभावासन्नत्वेन दशमभावस्य याम्योत्तरवृत्तस्थत्वेन लाघवार्थं दशमभावमेव त्रिभोनलग्नं प्रकल्प्य तन्नतांशज्या मध्यज्यारूपा त्रिभोनलग्नदृक्क्षेपः। उन्नतज्या शङ्कुर्दृग्गतिः। इदमतिस्थूलम्। यैस्तु भगवतोक्तं मध्यलग्नं दशमभावपरतया व्याख्यातं तेषां मत एतदुक्तमिति सूक्ष्मम्। प्रयाससाधितदृक्क्षेपदृग्गती प्रागुक्ते सूक्ष्मे अप्यतिस्थूले इति ध्येयम्। भास्कराचार्यैस्तु” “त्रिभोनलग्नस्य दिनार्धजाते नतोन्नतज्ये यदि वा सुखार्थम्”। इति यदुक्तं तदस्मात् सूक्ष्ममिति ध्येयम्” रङ्ग०। [तीर्णदृक्पथे” नैष०।

**दृक्पथ** पु० ६त०। दृष्टियोग्ये स्थाने। “क्रमेण तस्मिन्नथ-

**दृक्प्रसाद** स्त्री दृशं प्रसादयति अञ्जनेन प्र+सद+णिच् अण् दृशः प्रसादो यस्याः वा। कुलत्थायां राजनि० तदञ्जनेन नेत्रयोः प्रसादनात्तस्यास्तथात्वम्।

**दृक्प्रिया** स्त्री दृशं प्रीणाति प्री—क। शोभायां राजनि० शोभादर्शने हि, दृशोस्तद्द्वारात्मनः प्रीणनात्तस्यास्तथात्वम्

**दृक्शक्ति** स्त्री दृक् प्रकाशनमेव शक्तिः। १प्रकाशरूपे चैतन्ये २तद्युक्ते सर्वप्रकाशके चेतने पुरुषे च “दृग्दर्शनशक्त्योरेकात्मतेवास्मिता” पात०सू० “पुरुषोदृक्शक्तिर्बुद्धिर्दर्शनशक्तिः” भा०।

**दृक्श्रुति** पु० दृक् नेत्रमेव श्रुतिः श्रवणमस्य। चक्षुःश्रवसि सर्पे हला०। [धिष्ठातृत्वेन तदध्यक्षत्वम्।

**दृगध्यक्ष** पु० ६त०। सूर्ये शब्दार्थकल्पतरुः। तस्य नेत्रा-

**दृगल** न० दृशे दर्शनायालति अल—पर्य्याप्तौ अच्। शकलखण्डे “पुरा दृगलं प्रक्तमिन्द्रामित्रः” आश्व०श्रौ० ५।७।२ “दृगलं शकलम्” नारा०।

**दृग्गति** स्त्री ६त०। १दृशोर्गतौ सू०सि० उक्ते ग्रहस्फुटोपयोगिनि २दृशोगतिभेदे दृक्क्षेपशब्दे दृश्यम्।

**दृग्गोल** न० खगोलान्तर्गते गोलभेदे यथोक्तं सि०शि० “बद्ध्वा खगोले नलिकाद्वयं च ध्रुवद्वये तन्नलिकास्थमेव। बहिः खगोलाद्विदधीत धीमान् दृग्गोलमेवं खलु वक्ष्यमाणम्। भगोलवृत्तैः सहितः खगोलो दृग्गोलसंज्ञोऽपममण्डलाद्यैः। द्विगोलजातं खलु दृश्यतेऽत्र क्षेत्रं हि दृग्गोलमतो वदन्ति”। “तस्मिन् खगोले ध्रुवचिह्नयोर्नलिकाद्वयं बद्ध्वा तन्नलिकाधारमेव खगोलाद्बहिरङ्गुलत्रयान्तरे दृग्गोलं रचयेत्। कथितैः खगोलवृत्तैर्वक्ष्यमाणैर्भगोलवृत्तैः क्रान्तिविमण्डलाद्यैर्यो निबध्यते स दृग्गोलः। कथमस्य दृग्गोलसंज्ञेति तदर्थमाह। द्विगोलजातमित्यादि। यतोऽग्राकुज्यासमशङ्क्वाद्यक्षक्षेत्राणि द्विगोलजातानि भगोलवृत्तैः खगोलवृत्तमिलितैस्तान्युत्पद्यन्ते। भिन्नगोलबन्धे सम्यङ् नोपलभ्यन्त इति दृग्गोलः कृतः” प्रमि०।

**दृग्ज्या** स्त्री सू०सि० उक्तायां दिनमानादिज्ञानार्थं शङ्कुच्छायोपयोगिन्यां दृष्टियोग्यायां दृग्वृत्तक्षेत्रस्थजीवायाम् यथोक्तं